## प्रपिपथमेति ठंश्च । (४२/१६०२)

प्रतिपथशब्दाद् [1]द्वितीयासमर्थाद् एति इत्यस्मिन्नर्थे ठन् प्रत्ययो भवति, चकाराट् ठक् च। प्रतिपथमेति प्रतिपथिकः, प्रातिपथिकः ॥

## समवायान् समवैति । (४३/१६०३)

समवायवाचिभ्यः शब्देभ्यः तद् इति द्वितीयासमर्थेभ्यः समवैति इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। समवायः समूहः [2]उच्यते, न संप्रधारणा। [3]समवायान् इति बहुवचनं सरूपविधिनिरासार्थम्। समवैति आगत्य तदेकदेशी भवति इत्यर्थः। समवायान् समवैति सामवायिकः। सामाजिकः। सामूहिकः। सान्निवेशिकः ॥

## परिषदो ण्यः । (४४/१६०४)

[4]परिषदः ण्यः प्रत्ययो भवति समवायान् समवैति इत्येतस्मिन् विषये। ठकोऽपवादः। परिषदं समवैति पारिषद्यः ॥

## सेनाया वा । (४५/१६०५)

सेनाशब्दाद्[5] वा ण्यः प्रत्ययो भवति समवायान् समवैति इत्येतस्मिन्नर्थे। ठकोऽपवादः। पक्षे सोऽपि भवति। सेनां समवैति सैन्यः, सैनिकः[6] ॥

## सञ्ज्ञायां ललाटकुक्कुट्यौ पश्यति । (४६/१६०६)

ललाटकुक्कुटीशब्दाभ्यां तद् इति द्वितीयासमर्थाभ्यां पश्यति इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति सञ्ज्ञायां विषये। सञ्ज्ञाग्रहणमभिधेयनियमार्थं, न [7]तु रूढ्यर्थम्। ललाटं पश्यति लालाटिकः सेवकः। कौक्कुटिको भिक्षुः। सर्वावयवेभ्यो ललाटं दूरे दृश्यते। तदनेन [8]ललाटदर्शनेन सेवकस्य स्वामिनं प्रति अनुपश्लेषः कार्येषु[9]अनुपस्थायित्वं लक्ष्यते। लालाटिकः सेवकः। स्वामिनः कार्येषु नोपतिष्ठते इत्यर्थः। कुक्कुटीशब्देनापि कुक्कुटीपातो लक्ष्यते। देशस्याल्पतया हि भिक्षु[10]रविक्षिप्तदृष्टिः पादविक्षेपदेशे चक्षुः संयम्य गच्छति स उच्यते कौक्कुटिकः इति[11] ॥

---

1. तद् इति इत्यधिकम् क. 2. इह इत्यधिकम् ब.क.ड.इ. 3. समवायान् इति नास्ति फ. 4. परिषद्-शब्दात् फ, परिषत्शब्दात् द्वितीयासमर्थात् समवैति इत्येतस्मिन्नर्थे ण्यप्रत्ययो भवति। पारिषद्यः। परिषद इत्यधिकरणे क्विप्। पृषोदरादित्वात् पर्षदपि। ततोऽपि एकदेशविकृतस्य अनन्यत्वात् पार्षदः। पार्षद्यः इत्यन्ते। तत्र भवः पारिषदः। क.ड. 5. द्वितीयासमर्थात् इत्यधिकम् ड. 6. वाग्रहणात् सेना एव सैन्यम् इत्यधिकम् क. 7. तु नास्ति फ. 8. ललाट नास्ति फ. 9. अनुपस्थायकत्वम् ब.क. 10. अवक्षिप्तदृष्टिः क. 11. तद-यमभिधेये नियमः संज्ञाग्रहणेन क्रियते। कुक्कुटी दाम्भिकचेष्टा इत्यधिकम् ब.क.ड.इ.ह.